अजुड़ीत् जुजोड । घञि जुडः । [ धञि जोडः ।

**जुड** गतौ तु० पर० सक०सेट् । जुडति अजोडीत् । जुजोट ।

**जुत** दीप्तौ भ्वा० आत्म० अक० सेट् । जोतते अजोतिष्ट । जुजुते । ऋदित् अजुजोतत् ।

**जुन** गतौ तु० पर०सक०सेट् । जुनति अजोनीत् । जुजोन ।

**जुम्बक** पु० वरुणे "पृथिवीं त्वचा जुम्बकाय स्वाहा" यजु० २५।८। "जुम्बकाय वरुणाय" वेददी० "प्रत्येव तिष्ठति जुम्बकाय स्वाहेत्यवभृथ उत्तमामाहुतिं जुहोति वरुणो वै जुम्बकः" शत० ब्रा० १२।३।६।५।

**जुर्व** पु० बधे भ्वा० पर० सक० सेट् । जुर्वति अजूर्वीत् । जूर्त्तः जूर्त्तिः । क्विपि जूः ।

**जुल** पेषणे चु० उभ०सक०सेट् । जोलयति ते अजूजुलत् त

**जुवस** त्रि० सो०जु–बा० असुन् किच्च । वेगवति । "आ नः सोमः सहो जुवो रूपम्" ऋ० ८।६५।१८ ।

**जुष** तृप्तौ अक०तर्के सक० वा चु०उभ०पक्षे भ्वा० पर०सेट् । जोषयति ते जोषति अजूजुषत् त अजोषीत् ।

**जुष** हर्षे अक० सेवायां सक० तुदा० आ० सेट् । जुषते अजोषिष्ट जुजुषे जुषमाणः । ईदित् । जुष्टः । ओीत् वर्त्तमाने क्त । जुष्टः । "पौलस्त्योऽजुषत शुचं विपन्नबन्धुः" भट्टिः "यत्र देवासो अजुषन्त विश्वे" यजु० ४।१। "इन्द्र ! जुषस्व प्रवह" अथ० २।५।१। "अजामेकाम्–अजोह्येको जुषमाणोऽनुशेते" श्वेताश्वतरोप०। "एवैव बुद्धिर्जुषतां सदात्मनाम्" भा० व०१२५८६ श्लो० । "सत्वं जुषाणाय भवाय देहिनाम्" भाग० ८।५।२२ । "परजुष्टत्वयान्विवर्त्तमानः" दीधितिः । आर्षे गणव्यत्यसात् अदादित्वम् । "देवा नास्मद्विधानाद्भि हविर्जुषन्ति" भा०व०१२७३। आर्षत्वात् पदव्यत्ययः। "पारिजातगुणान् मर्त्या जुषन्ति यदि नारद ! । देवानां मानुषाणां च न विशेषो भविष्यति" हरिवं० ७२७२ । लेटि जोजिषत् "सुपेशसस्करति जोजिषद्धि" ऋ० २।३५।१ "जुषी प्रीतिसेवनयोः लेट्यडागमः । विकरणः सिप् । ध्रुडागमश्च" भा० । प्राद्य पवर्गपूर्वकस्य प्रादित्योत्यतत्तदर्थयुक्ते सेवनादौ ।

**जुष्क** पु० जु–क्क् ततः संज्ञायां कन् । यूषे शब्दच० ।

**जुष्ट** न०जुष–कर्म्मणि क्त ।१उच्छिष्टे । २सेविते त्रि० मेदि० "परजुष्टत्वयान्विवर्त्तमानः"दीधितिः। "पुण्यो महाब्रह्मसमूहजुष्टः" भट्टिः । [सेवने न० ।

**जुष्य** त्रि०जुष–कर्म्मणि क्यप् । १सेव्ये भावे क्यप् ।२अवश्य-

**जुहुराण** पु० । ह्वृच्छ–सन्–आनच् सनो लुक् छलोपश्च । १चन्द्रे पु०उज्ज्वल० । २कौटिल्यकारिणि त्रि० । "युयोध्यस्मज्जुहुराणमेनः" ह० उ० । "जुहुराणं कुटिलकारिणम्"भाष्यम् ।

**जुहुवान** पु० हु–कर्म्मणि कानच् । १अग्नौ २वृक्षे च । संक्षिप्तसारे कठिनहृदये इत्युक्तिः रमध्यस्यैव तदर्थता ह्वर्च्छेस्तद्रूपसिद्धेस्तदर्थतौचित्यात् अतस्तत्र लिपिकरप्रमादात् जुहुवान इत्यपपाठः जुहुराण इत्येव पाठः समुचितः ।

**जुहू** स्त्री जुहोत्यनया हु–क्विप् नि० द्वित्वं दीर्घश्च । यज्ञिये स्रुगाख्ये पात्रभेदे सा च पलाशघटिता" "पालाशी जुहूः" कात्या० श्रौ० १।३।२४ । "जुहोत्यनया जुहूः स्रुक् सा च पालाशी पलाशवृक्षकाष्ठनिर्म्मिता" कर्कः । "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति" श्रुतिः । "पर्णमयी पलाशकाष्ठमयीत्यर्थः"। एषा चानारभ्याधीताऽपि प्रकृत्यर्था यथोक्तं ताण्ड्य० ब्रा० ।

"अनारभ्याधीतानां प्रकृतिगामित्वमिति न्यायेन क्रत्वङ्गत्वावगमात् । स च न्यायस्तृतीयाध्याये षष्ठपादस्य प्रथमाधिकरणे पर्णवाक्यमुदाहृत्याभिहितः । "प्रकृतौ विकृतौ वा साद्यस्य पर्णत्वसौ विधिः । प्रकृतेरेव वा तुल्याद्वचनादुभयोरसौ । जुहूमाश्रित्य पर्णत्वविधिः प्रकृतिमात्रगः । चोदकेनोभयप्राप्तेर्विकृतौ विधिनात्र किम्"। अनारभ्य श्रूयते"यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोतीति" । तत्राव्यभिचरितक्रतुसम्बन्धवतीं जुहूमाश्रित्य तद्धेतुः पर्णवृक्षो वाक्येन विधीयते । या जुहूः सा पर्णमयीति वाक्यञ्च प्रकृतिविकृत्योस्तुल्यमेव प्रवर्त्तते उभयत्राश्रयभूताया जुह्वाः सत्त्वात् । तस्मात् प्रकृतिविकृत्योरुभयोरयं विधिरिति प्राप्ते, ब्रूमः किमयं विधिर्विकृतौ चोदकात् पूर्वन्निविशते पश्चाद्वा । नाद्यः, आश्रयभूताया जुह्वाः चोदकमन्तरेणासम्भवात् । द्वितीये तु पर्णत्वमपि जुह्वा सहैव चोदकेनातिदिश्यते, तत्र पुनर्विधिवैयर्थ्यादयं विधिः प्रकृतिमात्रगः" । जुहोत्यस्यां दिशि–आधारे क्विप् । २प्राग्देशे प्राङ्मुखतयैव होमकरणात् तस्यास्तथात्वम् ।

**जुहूरा(वा)ण** पु०जुहूं र(व)णति र(वण–अण् । १अध्वर्य्यौ । २अग्नौ । ३चन्द्रे विश्वः । [वः । अग्नौ शब्दर० ।

**जुहूवत्** पु० जुहूपात्रं होमोद्देश्यतयास्त्यस्य मतुप् वा० मस्य

**जुहोति** स्त्री जु–धात्वर्थनिर्द्देशे श्तिप् । होमभेदे "यजति